कुल छपे पृष्ठों की संख्या -04
कुल छपे प्रश्नों की संख्या -20

नामांक ROLL NO. **BSS-X-3**

# अर्द्ध वार्षिक परीक्षा, 2017-18

## कक्षा - 10 X

समय : 3¼ घण्टे | विषय - संस्कृतम् | पूर्णांक : 70

**निर्देश : (1) सर्वे प्रश्नाः अनिवार्याः।**

1. अधोलिखितस्य गद्यांशस्य सप्रसंग हिन्दीभाषया अनुवादं करोतु- 5

प्रतापस्य चिन्तां विभाव्य 'भामाशाह' नामा कश्चित् श्रेष्ठी किमपि महत्कार्य कर्तुं कालः समायातः इति भावितवान्। सः प्रतापं निकषा गत्वा उवाच- "प्रभो! अहं भवद्वंशस्य सेवकः, मम हस्ते प्रभूतं धनं विद्यते। तेन भवान् पञ्च विंशतिसहस्त्रसैनिकान् द्वादश वर्ष पर्यन्तं पालयितुं प्रभविष्यति" इति। तदा प्रताप उवाच- "अहं नैतद्धनं स्वीकृतुं शक्नोमि, एतद् धनं भवता अर्जितमस्ति"। तदा भामाशाहः प्रावोचत्- "नैतद्धनं परकीयम्। देशरक्षार्थं मया अर्जित मिदं धनं यदि सहायकं भवेत् तर्हि मम जीवनं सार्थकं भविष्यति" इति। भामाशाहस्य वचनं श्रुत्वा प्रतापस्य मनः असीमसान्त्वानाम् आप्तवान्।

अथवा

सत्यं वद। धर्मं चर। स्वाध्यान्मा प्रमदः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यम्। देवपितृ कार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यानि अनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि।

2. अधोलिखितस्य पद्यांशस्य सप्रसंग हिन्दीभाषया अनुवादं करोतु- 5

विद्या विवादाय धनं मदाय शक्तिः परेसां परपीडनाय।
खलस्य साधोर्विपरीतमेतत्, ज्ञानाय, दानाय च रक्षणाय।।

अथवा

गुणैः गौरवमायाति नोच्चैः आसनमास्थितः।
प्रासाद शिखरस्थोऽपि काको न गरुडायते।।

3. अधोलिखितस्य पद्यांशस्य सप्रसंग संस्कृत व्याख्यां करोतु- 4

अपि स्वर्णमयी लंङ्का न मे लक्ष्मण रोचते।
जननी जन्मभूमिश्च स्वर्गादीप गरीयसी।।

अथवा

मानं मनीषिता मैत्री मरुदुष्णं मरीचिका।
मृगाः मूर्ध्नि मनुष्याणाम् उष्णीषं प्रमुखम्भरौ।।

4. अधोलिखितस्य नाट्यांशस्य सप्रसंग संस्कृत-व्याख्यां करोतु- 3

प्रतापः - (साश्चर्यम्) किम् इदं भवान् करोति? भवदीया सम्पतिः कथं मदीया? किम् एतेन न मे अपमानः? न अहंएतां सम्पतिं पुनराददामि।

कृ.प.उ.



भामाशाहः- (सविनयम्) महाराज! न अहम् अपमानं करोमि। का तुच्छसेवके शक्तिः यया असौ तथा दुःसाहसं कुर्यात्। गृह्यतां महाराज! गृह्यताम्!! देश-धर्मयोः रक्षा विधीयताम्।

प्रतापः- (सहर्षम आदाय) धन्यः असि मन्त्रिवर्य! धन्यः। त्वदीया जननी धन्या। कथ्यतां तु अभिन्नहृदय! अस्यां कियती सम्पतिः?

अथवा

राजा- किमर्थं प्रतिषिद्धाः स्मः?
प्रथमा- शृणोतु महाराजः। एषाऽपराजिता नामौषधिरस्य जातकर्मसमये भगवता मारीचेन दत्ता। एतां किल माता पितरावात्मानं च वर्जयित्वाऽपरो भूमपतितां न गृह्णति।
राजा- अथ गृह्णति?
प्रथमा- ततस्तं सर्पो भूत्वा दशति।
राजा- भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया?
उभे- अनेकशः।

5. अधोलिखितेषु प्रश्नेषु केषांचन षट् प्रश्नानामुतराणि संस्कृतमाध्यमेन लिखतु-½x6=3

(i) भामाशाहः किम् आदाय प्रतापस्य समीपम् आगच्छति?
(ii) विद्यायाः प्रकारद्वयं किमस्ति?
(iii) मम किं करणीयम्?
(iv) सर्वे जन्तवः केन तुष्यन्ति?
(v) केन सह प्रतापस्य अनेकवारं युद्धम् अभवत्?
(vi) कातरः युद्धे किं कुर्यात्?
(vii) स्वामी केशवानन्दस्य जीवनं कस्य निदर्शनमस्ति?
(viii) अस्माभि कुत्र चरणीयम्?

6. रेखांकित पदमाधृत्य प्रश्न निर्माणं करोतु- 1x3=3

(i) भारतमाता नानातीर्थैः रमणीया। 1
(ii) व्रतदानयज्ञैः देवा प्रसन्नाः। 1
(iii) निजसौख्यं न मननीयम्। 1

7. प्रश्नपत्रादतिरिच्य स्वपाठ्य पुस्तकात् श्लोक द्वयं लिखतु। 1½x2=3

8. अधोलिखितं गद्यांशं पठित्वा एतदाधारित प्रश्नाम् उत्तराणि यथानिर्देशं लिखतु-

अस्मिन संसारे असंख्याः भाषाः सन्ति। तासु भाषासु संस्कृत भाषा सर्वोत्तमा [illegible] संस्कृता परिष्कृता दोषरहिता भाषा एव संस्कृत भाषा कथ्यते। इयमेव भाषा देववाणी, गीर्वाणगीः, सुरवाणी इत्यादिभिः शब्दै संबोध्यते। एतानि नामानि एव अस्याः भाषायाः महत्वं सूचयन्ति।

संस्कृतभाषा जगतः सर्वासां भाषाणां जननी अस्ति। सर्वभाषाणां मूलरूप [illegible] एतस्या आवश्यकता भवति। यादृशं महत् साहित्यं संस्कृत-भाषायाः अस्ति तादृशं अन्यासां भाषाणां नास्ति। अस्यामेव भाषायां ब्राह्मण-ग्रन्थाः आरण्यकाः अध्यात्मविषय प्रतिपादिका उपनिषदः, वेदादयश्च सन्ति। आदिकाव्यं रामायणं वीरकाव्यं महाभारतमपि संस्कृतस्य गौरवं वर्धयतः। अनयोः ग्रन्थयोः विषयं गृहीत्वा एव विशालस्य (संस्कृत)

1×7=7

साहित्यस्य रचना संजाता।

(क) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत:।

(ख) सर्वोत्तमा भाषा का विद्यते?

(ग) सर्वभाषाणां मूलरूपं ज्ञानाय कस्या: आवश्यकता भवति?

(घ) कीदृशी भाषा संस्कृतभाषा कथ्यते?

(ङ) संस्कृतभाषा कै: शब्दै: संबोध्यते?

(च) अस्मिन गद्यांशे 'असंख्या:' इति विशेषणपदस्य विशेष्यं किम्?

(छ) "संस्कृतभाषा सर्वोत्तमा विद्यते" इत्यत्र क्रियापदं किम्?

9. अधोलिखित पदयो: सन्धि विच्छेदं कृत्वा सन्धे नामापि लिखत- 1×3=3

(i) दिगम्बर: (ii) नायक: (iii) एकैक:

10. अधोलिखित रेखांकित पदेषु समस्त पदानां विग्रहम् अथवा विग्रह पदानां समासं कृत्वा समासस्य नामापि लिखतु- 1×3=3

(i) इदं स्थानं निर्जलम् अस्ति। (ii) त्रिनेत्रधारी न च शूलपाणि।

(iii) अल्पानां वस्तुनां संहति: कार्य साधिका भवति।

11. अधोलिखित रेखांकित पदेषु विभक्तिं तत् कारणम् च लिखतु- 1×3=3

(i) हनुमते नम:। (ii) अलं विवादेन।

(iii) पिता पुत्रे स्निह्यति। rbseonline.com

12. कोष्ठकेषु प्रदत- प्रकृति प्रत्ययानुसारं शब्द निर्माणं कृत्वा रिक्त स्थानामि पूरियत्वा-

(i) अस्माभि: अनुशासनं ..............। (पाल्+अनीयर)

(ii) तस्य माता .............. अस्ति। (चतुर+टाप्) 1×2=2

13. अधोलिखित वाक्ययो: रेखांकित पदेषु प्रकृतिं प्रत्ययं च पृथक कृत्वा लिखतु-

(i) अद्य अस्माकं वार्षिकी परीक्षा आरभ्यते।

(ii) बुद्धिमान् नर: सर्वत्र: मानं लभते। 1×2=2

14. मंजुषायां प्रदतै: अध्यय पदै: रिक्त स्थानानि पूरयित्वा लिखतु- 1×3=3

पुरा, सहसा, यथा उच्चै:

(i) .......... गायति स: गायक:। (ii) ........ संस्कृतभाषा जनभाषा आसीत्।

(iii) .......... क्रियां न विदधीत।

15. अधोलिखित वाक्यानां वाच्यपरिवर्तनं कृत्वा लिखतु- 1×3=3

(1) अहं ग्रामं गच्छामि। (2) सीतया पुस्तकं पठयते।

(3) शीलया हस्यते।

16. घटिका चित्र सहायतया अंकानां स्थाने संस्कृत शब्देषु समय-लेखनं करोतु-1×3=3

(i) (5.15 प्रात:) मम जनक: .......... वादने जयपुरं गमिष्यति।

(ii) (10.45 प्रात:) भाषण प्रतियोगिता ................ आरम्भत!

(iii) (12.30 मध्याह्ने) .......... वादने जयपुरात् गृहम् आगच्छामि।

17. स्वं दोषेशं मध्य राजकीय उच्च मा. वि. रामपुरस्य प्रधानाचार्याय अस्वस्थता कारणात् त्रिदिवसस्य अवकाशार्थं संस्कृते प्रार्थना पत्र लिखतु। 4

कृ.प.उ.



**अथवा**

भवान् गणेश: अस्ति। भवत: ग्रामे कार्तिक पूर्णिमायां दिवसे संस्कृत नाटकस्य मञ्चनम् भविष्यति। तदर्थं स्वमित्रम् गोविन्दं प्रति लिखितं आमन्त्रण पत्रं मञ्जूषा पद सहायतया पूरयित्वा पुन: उत्तर-पुस्तिकायां लिखत। ½×8=4

**मञ्जूषा**- मञ्चनं, परीक्षाकक्षम्, गोविन्दं, कालिदास, प्रणामं करिष्यामि, द्रष्टुम्, ग्रामे

..............

दिनाङ्क:..........

प्रिय मित्र ..........

अत्र कुशलं तत्रास्तु। अस्माकं .......... दिनांङ्कत: 15.12.17 दिनाङ्क 16.12.17 पर्यन्तं .......... विरचितं नाटकस्य .......... भविष्यति। अस्मिन् नाटके अहं यक्षस्य अभिनयं .......... । भवान् द्रष्टुम आगमिष्यति। तत् .......... आगच्छतु। सर्वेभ्य: वृद्धेभ्य: .......... निवेधताम्।

भवत: मित्रम्

गणेश:

18. मञ्जूषात: उचितानि पदानि चित्वा अधोलिखत "मातापुत्रयो: संवादं" लिखत।

**मञ्जूषा**- धनं, शर्करां, पठित्वा, अरब, द्विदलं च, करोषि, दुग्धं, आनयामि।

½×8=4

माता - कनक! किं .......... त्वम्।

कनक: - पाठं पठामि ..........

माता - दुग्धं पीतवान्?

कनक: - .......... नैव पीतम्।

माता - तर्हि दुग्धं .......... आपणं गच्छसि किम्।

कनक: - अम्ब! किम् .......... तत:।

माता - वत्स! आपणं गत्वा लवणं, .......... तण्डुलान्, गुंड, .......... आनय!

कनक: - तर्हि शीघ्रं .......... स्यूतं च ददातु अम्ब!

19. अधोलिखित वाक्येषु केषाञ्चनं चतुर्णां वाक्यानां संस्कृतभाषाया अनुवादं-1+1+1+1=4

(i) तुम वहाँ जाकर पढ़ो। (ii) वृद्ध पैर से लँगड़ा है।

(iii) यह कार्य करने योग्य है। (iv) पिता पुत्र के साथ गाँव गया।

(v) गंगा नदियों में पवित्र है। (vi) विद्या विनम्रता प्रदान करती है।

20. अधोलिखित वाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखतु-½×6=3

(i) स: प्रतिदनं बहून् पशून् हत्वा खादति स्म।

(ii) एकदा यदा शशकस्य क्रम: आगत:, तस्य विलम्बागमनेन सिंह: कुपित: जात:।

(iii) सिंह: जले स्वप्रतिबिम्बं दृष्ट्वा तस्मिन् कूपे अकूर्दत्।

(iv) कस्मिंश्चित् वे एक: सिंह: वसति स्म।

(v) तदा चतुर: शशक: सिंह कूपस्य समीपम् अनयत्।

(vi) अत: लोके प्रसिद्धं 'बुद्धिर्यस्य बलं तस्य' इति।



□□□